वने। यातेषु मृगयाश्चैव तृणविन्दोरथाश्रमम्” भा० श० ६२अ०।“तृणविन्दुप्रसादाच्च धौम्यस्य च महात्मनः” भा० वि० १२ अ०। “द्रौपदीमाश्रमे न्यस्य तृणविन्दोरनुज्ञया” भा० व० २६२ अ०। “चरतः किल दुश्चरं तपः तृणविन्दोः प्रतिशङ्कितः पुरा” रघुः।

**तृणविन्दुसरः** ६त०। तृणविन्दोः ऋषेः सरोरूपे तीर्थे तत्स्थानं भारते उक्तं यथा “मरुभूमेः शिरः स्थानं तृणविन्दुसरः प्रति” भा० द० २५७ अ०।

**तृणवीज** न० ६त०। श्यामाके धान्ये रत्नमा०।

**तृणशीत** न० तृणेषु शीतम्। १कत्तृणे गन्धतृणे रत्नमा०। २जलपिप्पल्यां स्त्री राजनि०।

**तृणशून्य** न०१तृणमिव शून्यं फलरहितम्। केतकीपुष्पे २मल्लिकायाञ्च मेदि० तयोः फलरहितत्वात्तथात्वम्। तृणेन शून्यम्। ३तृणरहिते त्रि०।

**तृणशूली** स्त्री तृणं शूलमिव तीक्ष्णाग्रं यस्याः गौरा०ङीष्। लताभेदे। “सुरसास्तृणशूल्याश्च सिन्धुवारस्य यानि च” (पुष्पाणि) सुश्रु०।

**तृणशोषक** पुंस्त्री तृणमपि शोषयति शुष–णिच्–ण्वुल् उप० स०। राजिमत्सर्पभेदे। अहिशब्दे ५८१ पृष्ठे दृश्यम्

**तृणशौण्डिका** स्त्री तृणेषु शौण्डिका। लघुकेतकीवृक्षे। पारस्करभिचराट्:। [हारा०।

**तृणषट्पद** पु० तृणमिव षट्पदः। (बोलता) वरोले

**तृणसारा** स्त्री तृणस्येव सारोऽस्याः। १कदल्याम् हारा०। तस्याः सर्वथाऽसारत्वात्तथात्वम्।

**तृणसिंह** पु० तृणे–सिंह इव। कुठारे शब्दार्थक०।

**तृणसोमाङ्गिरस्** पु०दक्षिणदिक्स्थिते धर्मराजस्य ऋत्विग्भेदे “उन्मुचुः प्रमुचुश्चैव स्वस्त्यात्रेयश्च वीर्य्यवान्। दृढव्यश्चोर्द्ध्वबाहुश्च तृणसोमाङ्गिरास्तथा। मित्रावरुणयोः पुत्रस्तथाऽगस्त्यः प्रतापवान्। धर्म्मराजर्त्विजः सप्त दक्षिणां दिशमास्थिताः भा० अनु० १५० अ०।

**तृणस्कन्द** तृणमिव स्कन्दति स्कन्द–अच्। तृणवञ्चलनस्वभावे “तृणस्कन्दस्य नु विशः” ऋ० १।१७२।३।

**तृणहर्म्य** पुंन०तृणव्याप्तो हर्म्यः। तृणव्याप्ते हर्म्ये हारा०

**तृणांह्रिप** पु०तृणरूपोऽङ्घ्रिपः। मन्थानतृणे राजनि०।

**तृणाग्नि** पु० तृणजातोऽग्निः शा० त०। तार्णे वह्नौ त्रिका०। “ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति” मनुः।

**तृणाञ्जन** पु० तृणमिवाञ्जनः। कृकलासे त्रिका०।

**तृणाटवी** स्त्री तृणप्रचुराटवी। तृणमये वने हेम०।

**तृणाढ्य** न० तृणेषु आढ्यम्। पर्वतजाते तृणे राजनि०।

**तृणादि** पु० चतुरर्थ्यां सप्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग० सू० उक्तो यथा
“तृण, नड़, मूल, वन, पर्ण वर्ण, वराण, विल, पुल, फल, अर्जुन, अर्ण, सुवर्ण, वल, चरण, वसु,”।

**तृणाम्ल** न० तृणेषु अम्लम्। तृणजलवणे राजनि०।

**तृणारणिन्याय** पु० तृणस्यारणेश्च वह्निजनने यथा परस्परनिरपेक्षतया कारणत्वमेवं स्वातन्त्र्येण कारणतासूचके न्यायभेदे।

**तृणावर्त्त** पु०तृणमावर्त्तयति भ्रमयति आ+वृत–णिच्–अण्। १वात्यारूपे वातसमूहे(घूर्णा)२तद्रूपजनभ्रामके असुरभेदे पु०

**तृणासृज** न०तृणेषु असृगिव रक्तत्वात्। तृणकुङ्कुमे राजनि०

**तृणेक्षु** पु० तृणमिक्षुरिव मधुररसत्त्वात्। वल्वजायां राजनि०।

**तृणेन्द्र** पु० तृणमिन्द्र इव। तृणराजे ताले वृक्षे। “हलीबल इति ख्यातो भविष्यति धराधरः। त्रिशिरास्तस्य देवस्य शातकुम्भमयोद्रुमः। ध्वजस्तृणेन्द्रो देवस्य भविष्यति रथाश्रितः” भा० आनु० १४७ अ०।

**तृणोत्तम** पु० तृणेषु उत्तमः। उखर्बले तृणे राजनि०।

**तृणोद्भव** पु० तृणेषूद्भवति उद्+भू–अच्। १नीवारे धान्यभेदे राजनि०। २तृणजाते वह्नौ च ३तज्जातमात्रे त्रि०।

**तृणोल्का** स्त्री तृणजाता उल्का। तृणजायामुल्कायाम् “न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया” हितो० “तृणोल्कया ज्ञायते जातरूपं वृत्तेन भद्रो व्यवहारेण साधुः” भा० उ० ३४ अ०। [घर)। हेमच०।

**तृणौकस्** न० तृणनिर्मितमोकः। तृणनिर्मिते गृहे (खड़ेर

**तृणौषध** न० तृणात्मकमौषधम्। एलवालुकाख्ये गन्धद्रव्ये शब्दच०।

**तृण्या** स्त्री तृणानां समूहः पाशा० य। तृणसमूहे।

**तृतीय** त्रि०त्रयाणां पूरणः त्रि+तीयट् संप्रसारणञ्च। त्रयाणां पूरणे। “वाग्दण्डं प्रथमं कुर्य्यात् धिग्दण्डं तदनन्तरम्। तृतीयं धनदण्डं तु वधदण्डमतःपरम्” “मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः। द्वितीयन्तु पितुस्तस्यास्तृतीयं तत्पितुः पितुः” मनुः।

**तृतीयक** पु० तृतीयेऽह्नि भवः रोगः कन्। तृतीयदिनभवे ज्वरभेदे स च “दिनमेकमतिक्रम्य यो भवेत् स तृतीयकः” इत्युक्तलक्षणः। “वाताधिकत्वात् प्रवदन्ति तज्ज्ञास्तृतीयकञ्चापि चतुर्थकञ्च” सुश्रुतः।

**तृतीयप्रकृति** स्त्री तृतीया प्रकृतिः प्रकारः। स्त्रीपुरुषा-